vyóma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

Laghu Siddhānta Kaumudī

(Part 2 - Subantas)

4.5 – īkārāntas 3



Dr. Sowmya Krishnapur

पुनरावर्तनम्

उणादिप्रत्ययान्तः, प्रत्ययस्य ईकारः	समासः, नदीसंज्ञकशब्दस्य ईकारः	कृदन्तः / समासः, धातोः ईकारः
विशिष्टकार्यं किमपि न	नदीसंज्ञाप्रयुक्तानि कार्याणि	धातु-ईकारप्रयुक्तानि कार्याणि
पपी (लोकान् पाति पा + ईप्रत्ययः)	बहुश्रेयसी (बह्व्यः श्रेयस्यः यस्य श्रेयसीशब्दः नित्यस्त्रीलिङ्गः)	प्रधी (प्रध्यायति प्र + ध्यै→धी + ~~क्विप्~~)
वातप्रमी (वातं प्रमिमीते प्र-मा + ईप्रत्ययः)	अतिलक्ष्मी (लक्ष्मीम् अतिक्रान्तः लक्ष्मीशब्दः नित्यस्त्रीलिङ्गः)	ग्रामणी (ग्रामं नयति ग्राम + नी + ~~क्विप्~~)

पुनरावर्तनम्

कृदन्तः / समासः, धातोः ईकारः	
एरनेकाचोऽसंयोगपूर्वस्य - यण्	अचि श्नुधातुभ्रुवां य्वोरियङुवङौ - इयङ्
अनेकाच् अङ्गम् + असंयोगपूर्वः ईकारः	एकाच् अङ्गम् / अनेकाच् अङ्गम् + संयोगपूर्वः ईकारः
प्रधी, सेनानी, ग्रामणी, उन्नी	नी, क्री यवक्री, सुश्री

ईकारान्तः पुंलिङ्गः प्रधी-शब्दः

- प्रध्यायति इति प्रधीः - प्र + ध्यै + व् (क्विप्)
  - प्र धि ऐ व् (ध्यायतेः सम्प्रसारणं च – वा॥)
  - प्रधि व् (सम्प्रसारणाच्च ६.१.१०८)
  - प्रधी व् (हलः ६.४.२)
  - प्रधी (वेरपृक्तस्य ६.१.६७)
- प्रधी – ईकारान्तः धातुः, अनेकाच् अङ्गम्, असंयोगपूर्वः

ईकारः – अजादौ प्रत्यये परे एरनेकाचः इति यण् ।

पपी → प्रधी – सर्वान् स्वरसन्धीन् बाधित्वा एरनेकाच... इति यण्

प्रधी (पुं)

ईकारान्तः पुल्लिँङ्गः 'प्रधी'-शब्दः

[He who meditates exceedingly well]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	प्रधीः	प्रध्यौ	प्रध्यः
सं. प्र. वि.	हे प्रधीः	हे प्रध्यौ	हे प्रध्यः
द्वि. वि.	प्रध्यम्	प्रध्यौ	प्रध्यः
तृ. वि.	प्रध्या	प्रधीभ्याम्	प्रधीभिः
च. वि.	प्रध्ये	प्रधीभ्याम्	प्रधीभ्यः
प. वि.	प्रध्यः	प्रधीभ्याम्	प्रधीभ्यः
ष. वि.	प्रध्यः	प्रध्योः	प्रध्याम्
स. वि.	प्रध्यि	प्रध्योः	प्रधीषु

इको यणचि

अमि पूर्वः

एरनेकाचोऽसंयोगपूर्वस्य

प्रथमयोः पूर्वसवर्णः, तस्माच्छसो नः पुंसि

अकः सवर्णे दीर्घः

199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये। प्रध्यौ।

प्रध्यः। प्रध्यम्। प्रध्यौ। प्रध्यः। प्रध्यि। शेषं पपीवत्।

199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२

एवं ग्रामणीः। ङौ तु ग्रामण्याम्॥

- ग्रामं नयति – ग्रामणी – ईकारान्तः धातुः, अनेकाच् अङ्गम्, असंयोगपूर्वः ईकारः । सर्वत्र एरनेकाचः... इति यण् ।
- सप्तम्येकवचने ङेराम्नद्याम्नीभ्यः ७.३.११६ – इति आमादेशः

199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२

एवं ग्रामणीः। ङौ तु ग्रामण्याम्॥

ग्रामणी इ [ङि]

- ग्रामणी आम् (ङेराम्नद्याम्नीभ्यः ७.३.११६)
- <u>ग्रामण्याम्</u> (एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२)

ग्रामणी, सेनानी, अग्रणी...

ग्रामणी (पुं)

ईकारान्तः पुल्लिङ्गः 'ग्रामणी'-शब्दः

[Leader of the village]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	ग्रामणीः	ग्रामण्यौ	ग्रामण्यः
सं. प्र. वि.	हे ग्रामणीः	हे ग्रामण्यौ	हे ग्रामण्यः
द्वि. वि.	ग्रामण्यम्	ग्रामण्यौ	ग्रामण्यः
तृ. वि.	ग्रामण्या	ग्रामणीभ्याम्	ग्रामणीभिः
च. वि.	ग्रामण्ये	ग्रामणीभ्याम्	ग्रामणीभ्यः
प. वि.	ग्रामण्यः	ग्रामणीभ्याम्	ग्रामणीभ्यः
ष. वि.	ग्रामण्यः	ग्रामण्योः	ग्रामण्याम्
स. वि.	ग्रामण्याम्	ग्रामण्योः	ग्रामणीषु

एरनेकाचोऽसंयोगपूर्वस्य

ङेराम्नद्याम्नीभ्यः

199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२

अनेकाचः किम्? नीः। नियौ। नियः। अमि शसि च परत्वादियङ्, नियम्। ङेराम्; नियाम्॥

- यत्र एरनेकाचः... इति यणः प्रसक्तिर्न, तत्र सर्वान् स्वरसन्धीन् बाधित्वा इयङादेशः ।
- नीधात्वन्तत्वात् ङेराम्नद्याम्नीभ्यः ७.३.११६ – इति आमादेशः

नीशब्दः - सर्वान् स्वरसन्धीन् बाधित्वा अचि श्नु... इति इयङ्

vyomalabs ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

नी (पुं)

ईकारान्तः पुंल्लिङ्गः 'नी'-शब्दः

[He who carries / leads]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	नीः	नियौ	नियः
सं. प्र. वि.	हे नीः	हे नियौ	हे नियः
द्वि. वि.	नियम्	नियौ	नियः
तृ. वि.	निया	नीभ्याम्	नीभिः
च. वि.	निये	नीभ्याम्	नीभ्यः
प. वि.	नियः	नीभ्याम्	नीभ्यः
ष. वि.	नियः	नियोः	नियाम्
स. वि.	नियाम्	नियोः	नीषु

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

ङेराम्नद्याम्नीभ्यः

199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२

असंयोगपूर्वस्य किम्? सुश्रियौ। यवक्रियौ॥

- सु श्रयति – सुश्री
- यवं क्रीणाति – यवक्री
- संयोगपूर्वः ईकारः, अतः यण् न । सर्वत्र अजादौ इयङादेशः

सुश्रीशब्दः - इयङ्

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

सुश्री (पुं)

ईकारान्तः पुल्लिङ्गः 'सुश्री'-शब्दः

[He who carries / leads]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	सुश्रीः	सुश्रियौ	सुश्रियः
सं. प्र. वि.	हे सुश्रीः	हे सुश्रियौ	हे सुश्रियः
द्वि. वि.	सुश्रियम्	सुश्रियौ	सुश्रियः
तृ. वि.	सुश्रिया	सुश्रीभ्याम्	सुश्रीभिः
च. वि.	सुश्रिये	सुश्रीभ्याम्	सुश्रीभ्यः
प. वि.	सुश्रियः	सुश्रीभ्याम्	सुश्रीभ्यः
ष. वि.	सुश्रियः	सुश्रियोः	सुश्रियाम्
स. वि.	सुश्रियि	सुश्रियोः	सुश्रीषु

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

पाठस्य सारांशः

कृदन्तः / समासः, धातोः ईकारः	
एरनेकाचोऽसंयोगपूर्वस्य - यण्	अचि श्नुधातुभ्रुवां य्वोरियङुवङौ - इयङ्
अनेकाच् अङ्गम् + असंयोगपूर्वः ईकारः	एकाच् अङ्गम् / अनेकाच् अङ्गम् + संयोगपूर्वः ईकारः
प्रधी, सर्ववी, जलशी	क्री, यवक्री, सुश्री
यण् + ङेराम् सेनानी, ग्रामणी, उन्नी	इयङ् + ङेराम् नी

पाठे अधीतः मूलभागः

- प्रधीः ॥
- 198 अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६.४.७७
- श्नु प्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। इति प्राप्ते –
- 199 एरनेकाचोऽसंयोगपूर्वस्य ६.४.८२
- धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये।

पाठे अधीतः मूलभागः

- प्रध्यौ। प्रध्यः। प्रध्यम्। प्रध्यौ। प्रध्यः। प्रध्यि। शेषं पपीवत्।
- एवं ग्रामणीः। ङौ तु ग्रामण्याम्॥
- अनेकाचः किम्? नीः। नियौ। नियः। अमि शसि च परत्वादियङ्, नियम्। ङेराम्; नियाम्॥
- असंयोगपूर्वस्य किम्? सुश्रियौ। यवक्रियौ॥

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

Laghu Siddhānta Kaumudī

(Part 2 - Subantas)

4.6 – īkārāntas 4



Dr. Sowmya Krishnapur

पुनरावर्तनम्

कृदन्तः / समासः, धातोः ईकारः	
एरनेकाचोऽसंयोगपूर्वस्य - यण्	अचि श्नुधातुभ्रुवां य्वोरियङुवङौ - इयङ्
अनेकाच् अङ्गम् + असंयोगपूर्वः ईकारः	एकाच् अङ्गम् / अनेकाच् अङ्गम् + संयोगपूर्वः ईकारः
प्रधी, सर्ववी, जलशी	क्री, यवक्री, सुश्री
यण् + ङेराम् सेनानी, ग्रामणी, उन्नी	इयङ् + ङेराम् नी

200 गतिश्च १.४.६०

प्रादयः क्रियायोगे गतिसंज्ञाः स्युः।

- गतिः १.१, च ०, [प्रादयः १.३], [क्रियायोगे ७.१]
- संज्ञासूत्रम्
- क्रियायोगे प्रादयः गतिसंज्ञाः भवन्ति
- “चकारः संज्ञासमावेशार्थः” (काशिका) – क्रियायोगे प्रादयः उपसर्गसंज्ञां गतिसंज्ञाञ्च उभयं प्राप्नुवन्ति ।

गतिकारकेतरपूर्वपदस्य यण् नेष्यते (वार्त्तिकम्)

ग्रामणी - ग्रामं नयति	पूर्वपदं कर्मकारकम्	यण् – ग्रामण्यौ
सेनानी – सेनां नयति	पूर्वपदं कर्मकारकम्	यण् - सेनान्यौ
जलशी – जले शेते	पूर्वपदम् अधिकरणकारकम्	यण् – जलश्यौ
प्रध्यायति – प्र+ध्यै	पूर्वपदं गतिसंज्ञकम्	यण् – प्रध्यौ
उन्नयति – उद्+नी	पूर्वपदं गतिसंज्ञकम्	यण् – उन्न्यौ
शुद्धधी – ध्यायति इति धीः । शुद्धा धीः यस्य सः	पूर्वपदं कारकं न, गतिसंज्ञकमपि न	इयङ् - शुद्धधियौ
सूक्ष्मधी - ध्यायति इति धीः । सूक्ष्मा धीः यस्य सः	पूर्वपदं कारकं न, गतिसंज्ञकमपि न	इयङ् - सूक्ष्मधियौ

रूपाणि “सुश्री”वत्

201 न भूसुधियोः ६.४.८५

एतयोरचि सुपि यण्न । सुधियौ। सुधिय इत्यादि॥

- न ०, भूसुधियोः ६.२, [सुपि ७.१], [यण् १.१], [अचि ७.१]
- निषेधसूत्रम्
- भूशब्दस्य सुधीशब्दस्य च अजादौ सुप्प्रत्यये परे यण् न भवति इति सूत्रार्थः
- सु इत्यस्य गतित्वात् एरनेकाचः... इति यणि प्राप्ते अनेन निषिध्यते

सुधीशब्दः – इयङ्

सुधी (पुं)

ईकारान्तः पुल्लिँङ्गः 'सुधी'-शब्दः

[He who meditates well]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	सुधीः	सुधियौ	सुधियः
सं. प्र. वि.	हे सुधीः	हे सुधियौ	हे सुधियः
द्वि. वि.	सुधियम्	सुधियौ	सुधियः
तृ. वि.	सुधिया	सुधीभ्याम्	सुधीभिः
च. वि.	सुधिये	सुधीभ्याम्	सुधीभ्यः
प. वि.	सुधियः	सुधीभ्याम्	सुधीभ्यः
ष. वि.	सुधियः	सुधियोः	सुधियाम्
स. वि.	सुधियि	सुधियोः	सुधीषु

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

नामधातुभ्यः निष्पन्नाः ईकारान्तशब्दाः

- नामधातुः = नामपदात् (सुबन्तात्) निष्पन्नः धातुः
- सुबन्तः + सनादिप्रत्ययः = नामधातुः
- सुखम् आत्मनः इच्छति → सुखम् + क्यच् → सुखीय
- सुखीय-धातुः – सुखीयति, सुखीयतः, सुखीयन्ति...
- सुखीय + क्विप् → सुखी

नामधातुभ्यः निष्पन्नाः ईकारान्तशब्दाः

Vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

- सुखम् (आत्मनः इच्छति)
- सुख अम् य [क्यच्] (सुप आत्मनः क्यच् ३.१.८ इति क्यच् प्रत्ययः)
- सुख य (सुपो धातुप्रातिपदिकयोः २.४.७१ इति अम् प्रत्ययस्य लोपः)
- सुखीय (क्यचि च ७.४.३३ इति ईकारादेशः)
- सुखीय व् (क्विप् च ३.२.७६ इति क्विप् प्रत्ययः)
- सुखीय् व् (अतो लोपः ६.४.४८ इति अकारलोपः)
- सुखी व् (लोपो व्योर्वलि ६.१.६६ इति यकारलोपः)
- सुखी (वेरपृक्तस्य ६.१.६७ इति वकारलोपः)

सुबन्तम् → धातुः → प्रातिपदिकम्

नामधातुभ्यः निष्पन्नाः ईकारान्तशब्दाः

सुखमिच्छतीति सुखीः। सुतीः। सुख्यौ। सुत्यौ। सुख्युः। सुत्युः। शेषं प्रधीवत्।

- सुखी, सुती – ईकारान्तः धातुः, अनेकाच् अङ्गम्, असंयोगपूर्वः ईकारः – एरनेकाचः... इति यण्
- ङसिङसोः यणादेशे कृते ख्यत्यात् परस्य ६.१.११२ इति अकारस्य उकारादेशः

सुखी, सुती

सुखी (पुं)

ईकारान्तः पुल्लिङ्गः 'सुखी'-शब्दः

[He who desires happiness]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	सुखीः	सुख्यौ	सुख्यः
सं. प्र. वि.	हे सुखीः	हे सुख्यौ	हे सुख्यः
द्वि. वि.	सुख्यम्	सुख्यौ	सुख्यः
तृ. वि.	सुख्या	सुखीभ्याम्	सुखीभिः
च. वि.	सुख्ये	सुखीभ्याम्	सुखीभ्यः
प. वि.	सुख्युः	सुखीभ्याम्	सुखीभ्यः
ष. वि.	सुख्युः	सुख्योः	सुख्याम्
स. वि.	सुख्यि	सुख्योः	सुखीषु

एरनेकाचोऽसंयोगपूर्वस्य

ख्यत्यात्परस्य

ईकारान्तपुंलिङ्गशब्दाः - सङ्ग्रहः

उणादिप्रत्ययान्तः, प्रत्ययस्य ईकारः	समासः, नदीसंज्ञकशब्दस्य ईकारः	कृदन्तः / समासः, धातोः ईकारः	
विशिष्टकार्यं किमपि न	नदीसंज्ञाप्रयुक्तानि कार्याणि	अनेकाच् + असंयोगपूर्वः + गति-कारकपूर्वः	एकाच् / संयोगपूर्वः अनेकाच् / गतिकारकेतरपूर्वः अनेकाच्
यण्, पूर्वरूपम्, पूर्वसवर्णदीर्घः, सवर्णदीर्घः	सम्बुद्धिह्रस्वः, आट्, नुट्, आम्, सन्धयः	एरनेकाचः... - यण्	अचि श्नुधातुभ्रुवाम्.. – इयङ्
1 पपी, वातप्रमी	सुलोपः - बहुश्रेयसी 2	प्रधी 4	सुश्री, यवक्री, शुद्धधी, सुधी 7
	सुलोपः न - अतिलक्ष्मी 3	यण् + आम् - ग्रामणी 5	इयङ् + आम् - नी 8
		यण् + उत् - सुती, सुखी 6	---

पाठे अधीतः मूलभागः

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

- 200 गतिश्च १.४.६०
- प्रादयः क्रियायोगे गतिसंज्ञाः स्युः।
- गतिकारकेतरपूर्वपदस्य यण् नेष्यते (वार्त्तिकम्) । शुद्धधियौ॥
- 201 न भूसुधियोः ६.४.८५
- एतयोरचि सुपि यण्न। सुधियौ। सुधिय इत्यादि॥ सुखमिच्छतीति सुखीः। सुतीः। सुख्यौ। सुत्यौ। सुख्युः। सुत्युः। शेषं प्रधीवत्।

vyóma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

Laghu Siddhānta Kaumudī

(Part 2 - Subantas)



4.7 – ukārānta pulliṅgas 1

Dr. Sowmya Krishnapur

4. हरि (पुं)

इकारान्तः पुल्लिँङ्गः 'हरि'-शब्दः

[(God) Viṣṇu]

	ए.व.	द्वि.व.	ब.व.
प्र. वि.	हरिः	हरी	हरयः
सं. प्र. वि.	हे हरे	हे हरी	हे हरयः
द्वि. वि.	हरिम्	हरी	हरीन्
तृ. वि.	हरिणा	हरिभ्याम्	हरिभिः
च. वि.	हरये	हरिभ्याम्	हरिभ्यः
प. वि.	हरेः	हरिभ्याम्	हरिभ्यः
ष. वि.	हरेः	हर्योः	हरीणाम्
स. वि.	हरौ	हर्योः	हरिषु

एवं गिरि (Hill), रवि (Sun) इत्यादयः शब्दाः

जसि च - गुणः

ह्रस्वस्य गुणः - गुणः

आङो नाऽस्त्रियाम् - ना

घेर्ङिति - गुणः

ङसिङसोश्च - पूर्वरूपम्

अच्च घेः – अ+औ

शेषो घ्यसखि - घिसंज्ञा

आङो नाऽस्त्रियाम्

घेर्ङिति

अच्च घेः

29. शम्भु (पुं)

उकारान्तः पुल्लिँङ्गः 'शम्भु'-शब्दः

[(God) Śiva]

	ए.व.	द्वि.व.	ब.व.	
प्र. वि.	शम्भुः	शम्भू	शम्भवः	जसि च - गुणः
सं. प्र. वि.	हे शम्भो	हे शम्भू	हे शम्भवः	ह्रस्वस्य गुणः - गुणः
द्वि. वि.	शम्भुम्	शम्भू	शम्भून्	
तृ. वि.	शम्भुना	शम्भुभ्याम्	शम्भुभिः	आङो नाऽस्त्रियाम् - ना
च. वि.	शम्भवे	शम्भुभ्याम्	शम्भुभ्यः	घेर्ङिति - गुणः
प. वि.	शम्भोः	शम्भुभ्याम्	शम्भुभ्यः	ङसिङसोश्च - पूर्वरूपम्
ष. वि.	शम्भोः	शम्भ्वोः	शम्भूनाम्	
स. वि.	शम्भौ	शम्भ्वोः	शम्भुषु	अच्च घेः – अ+औ

एवं विष्णु ([God]Viṣṇu), भानु (Sun), सूनु (Son)

इत्यादयः शब्दाः

शम्भुर्हरिवत्।
एवं भान्वादयः॥

शेषो घ्यसखि - घिसंज्ञा

आङो नाऽस्त्रियाम्

घेर्ङिति

अच्च घेः

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

उकारान्तः पुंलिङ्गः क्रोष्टु-शब्दः

- शृगाल-वञ्चक-क्रोष्टु-फेरु-फेरव-जम्बुकाः (अमरः)
- क्रुश् (क्रुश आह्वाने रोदने च) + तुन् (उणादिप्रत्ययान्तः)

202 तृज्वत् क्रोष्टुः ७.१.९५

असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥

- तृज्वत् ०, क्रोष्टुः १.१, [असम्बुद्धौ ७.१], [सर्वनामस्थाने ७.१]
- अतिदेशसूत्रम् – तृज्वद्भावः अतिदिश्यते
- सम्बुद्धिभिन्ने सर्वनास्थाने परे कोष्टुशब्दस्य स्थाने कोष्टृशब्दस्य प्रयोगः कर्तव्यः

202 तृज्वत् क्रोष्टुः ७.१.९५

असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥

- तृज्वद्भावेन सूत्रत्रयम् अतिदिश्यते
  - ऋदुशनस्पुरुदंसोऽनेहसां च ७.१.९४ – अनङ् आदेशः
  - ऋतो ङिसर्वनामस्थानयोः ७.३.११० – गुणः
  - अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६.४.११ - उपधादीर्घः

203 ऋतो ङिसर्वनामस्थानयोः ७.३.११०

ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते -

- ऋतः ६.१, ङि-सर्वनामस्थानयोः ७.२, [अङ्गस्य ६.१], [गुणः १.१]
- विधिसूत्रम् - गुणविधानम्
- पितृ-ऋ + औ → पित्-अर् औ
- ऋकारस्य स्थाने विधीयमानः अण् अकारः रपरः

204 ऋदुशनस्पुरुदंसोऽनेहसां च ७.१.९४

ऋदन्तानामुशनसादीनाम् चानङ् स्यादसम्बुद्धौ सौ॥

- ऋत्-उशनस्-पुरुदंसस्-अनेहसाम् ६.३, च ०, [अङ्गानाम् ६.३], [असम्बुद्धौ ७.१], [सौ ७.१], [अनङ् १.१]
- विधिसूत्रम् – अनङ् आदेशविधानम्
- ऋदन्तानाम्, उशनस् पुरुदंसस् अनेहस् इति शब्दानां च सम्बुद्धिभिन्ने सुप्रत्यये परे अनङ् आदेशः भवति

204 ऋदुशनस्पुरुदंसोऽनेहसां च ७.१.९४

ऋदन्तानामुशनसादीनाम् चानङ् स्यादसम्बुद्धौ सौ॥

क्रोष्टु स् [सुँ]

- क्रोष्टृ स्   (तृज्वत् क्रोष्टुः ७.१.९५ इति तृज्वद्भावः)
- क्रोष्टन् स्   (ऋदुशनस्... ७.१.९४ इति अनङ् आदेशः)

205 अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ६.४.११

Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

अबादीनामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने।

- अप्-तृन्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणाम् ६.३, [उपधायाः ६.१], [दीर्घः १.१], [असम्बुद्धौ ७.१], [सर्वनामस्थाने ७.१]
- विधिसूत्रम् - उपधादीर्घविधानम्

205 अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६.४.११

अबादीनामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने। **क्रोष्टा।**

क्रोष्टु स् [सुँ]

- क्रोष्टृ स् (तृज्वत् क्रोष्टुः ७.१.९५ इति तृज्वद्भावः)
- क्रोष्टन् स् (ऋदुशनस्... ७.१.९४ इति अनङ् आदेशः)
- क्रोष्टान् स् (अप्तृन्तृच्... ६.४.११ इति उपधादीर्घः)
- क्रोष्टान् (हल्ङ्याब्भ्यो... ६.१.६८ इति सुलोपः)
- क्रोष्टा (नलोपः प्रातिपदिकान्तस्य ८.२.७ इति नलोपः)

205 अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६.४.११

अबादीनामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने। क्रोष्टा।

क्रोष्टारौ । क्रोष्टारः ।

क्रोष्टु औ

- क्रोष्टृ औ (तृज्वत् क्रोष्टुः ७.१.९५ इति तृज्वद्भावः)
- क्रोष्टर् औ (ऋतो ङिसर्वनामस्थानयोः ७.३.११० इति गुणः, रपरः)
- क्रोष्टार् औ (अप्तृन्तृच्... ६.४.११ इति उपधादीर्घः)
- क्रोष्टारौ

205 अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६.४.११

अबादीनामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। **क्रोष्टून्**॥

क्रोष्टु अस् [शस्]

- क्रोष्टूस् (प्रथमयोः पूर्वसवर्णः ६.१.१०२ इति पूर्वसवर्णदीर्घः)
- क्रोष्टून् (तस्माच्छसो नः पुंसि ६.१.१०३ इति नकारादेशः)

पाठस्य सारांशः

- शम्भुशब्दः – उकारान्तसामान्यशब्दः, घिसंज्ञकः । हरिशब्दवद् रूपसिद्धिः ।
- क्रोष्टुशब्दः – उकारान्तविशेषशब्दः ।
  - असम्बुद्धौ सर्वनामस्थाने तृज्वत् क्रोष्टुः ७.१.९५ इत्यतिदेशः
  - सौ ऋदुशनस्.. ७.१.९४ इति अनङ्, अप्तृन्.. ६.४.११ इति उपधादीर्घः
  - अन्येषु सर्वनामस्थानेषु ऋतो ङिसर्वनामस्थानयोः ७.३.११० इति गुणः रपरः (अर्), अप्तृन्.. ६.४.११ इति उपधादीर्घः

पाठे अधीतः मूलभागः

- 202 तृज्वत् क्रोष्टुः ७.१.९५
- असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥
- 203 ऋतो ङिसर्वनामस्थानयोः ७.३.११०
- ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते -

पाठे अधीतः मूलभागः

- 204 ऋदुशनस्पुरुदंसोऽनेहसां च ७.१.९४
- ऋदन्तानामुशनसादीनाम् चानङ् स्यादसम्बुद्धौ सौ॥
- 205 अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६.४.११
- अबादीनामुपधाया दीर्घः असंबुद्धौ सर्वनामस्थाने। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टॄन्॥

vyóma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

Laghu Siddhānta Kaumudī

(Part 2 - Subantas)



4.8 – ukārānta pulliṅgas 2

Dr. Sowmya Krishnapur

पुनरावर्तनम्

प्रथमा	क्रोष्टु स् क्रोष्टृ स् (तृज्वत् क्रोष्टुः) क्रोष्टन् स् (ऋदुशनस्..) क्रोष्टान् स् (अप्तृन्..) क्रोष्टान् (हल्ङ्याब्भ्यः..) क्रोष्टा (नलोपः...)	क्रोष्टु औ क्रोष्टृ औ (तृज्वत् क्रोष्टुः) क्रोष्टर् औ (ऋतो ङि..) क्रोष्टारौ (अप्तृन्..)	क्रोष्टु अस् क्रोष्टृ अस् (तृज्वत्..) क्रोष्टर् अस् (ऋतो ङि..) क्रोष्टारस् (अप्तृन्..) क्रोष्टारः
सं.प्र	हे क्रोष्टु स् हे क्रोष्टो स् (ह्रस्वस्य गुणः) हे क्रोष्टो (एङ्ह्रस्वात्...)	हे क्रोष्टु औ हे क्रोष्टृ औ (तृज्वत् क्रोष्टुः) हे क्रोष्टर् औ (ऋतो ङि..) हे क्रोष्टारौ (अप्तृन्..)	हे क्रोष्टु अस् हे क्रोष्टृ अस् (तृज्वत्..) हे क्रोष्टर् अस् (ऋतो ङि..) हे क्रोष्टारस् (अप्तृन्..) हे क्रोष्टारः

पुनरावर्तनम्

Samskrtam . Samskrtih . Samskārah
॥ वाचं धेनुमुपासीत ॥

द्विती.			
	क्रोष्टु अम् क्रोष्टृ अम् (तृज्वत् क्रोष्टुः) क्रोष्टर् अम् (ऋतो ङि..) क्रोष्टारम् (अप्तृन्..)	क्रोष्टु औ क्रोष्टृ औ (तृज्वत् क्रोष्टुः) क्रोष्टर् औ (ऋतो ङि..) क्रोष्टारौ (अप्तृन्..)	क्रोष्टु अस् क्रोष्टॄस् (प्रथमयोः...) क्रोष्टॄन् (तस्माच्छसो...)

206 विभाषा तृतीयादिष्वचि ७.१.९७

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्।

- विभाषा १.१, तृतीयादिषु ७.३, अचि ७.१, [क्रोष्टुः १.१], [तृज्वत् ०]
- अतिदेशसूत्रम् - तृज्वद्भावः अतिदिश्यते
- तृतीयादिषु अजादिषु विभक्तिषु क्रोष्टुशब्दस्य विकल्पेन तृज्वद्भावः

206 विभाषा तृतीयादिष्वचि ७.१.९७

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा।

क्रोष्टु आ [टा]

- क्रोष्टृ आ (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्ट्रा (इको यणचि ६.१.७७ इति यण्)

तृज्वद्भावाभावपक्षे

- क्रोष्टुना (आङो नाऽस्त्रियाम् ७.३.१२० इति नाभावः)

206 विभाषा तृतीयादिष्वचि ७.१.९७

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे॥

- क्रोष्टृ ए (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्ट्रे (इको यणचि ६.१.७७ इति यण्)

तृज्वद्भावाभावपक्षे

- क्रोष्टो ए (घेर्ङिति ७.३.१११ इति गुणः)
- क्रोष्टवे (एचोऽयवायावः ६.१.७८ इति अवादेशः)

207 ऋत उत् ६.१.१११

Saṃskṛtam . Saṃskṛtiḥ . Saṃskārah
॥ वाचं धेनुमुपासीत ॥

ऋतो ङसिङसोरति उदेकादेशः। रपरः॥

- ऋतः ५.१, उत् १.१, [ङसिङसोः ६.२], [अति ७.१], [पूर्वपरयोः ६.२], [एकः १.१]
- विधिसूत्रम् - उकारादेशविधानम्
- पित्-ऋ + अ-स् [ङसि/ङस्] → पित्-उर्-स्
- ऋकारस्य स्थाने विधीयमानः अण् उकारः रपरः

207 ऋत उत् ६.१.१११

ऋतो ङसिङसोरति उदेकादेशः। रपरः॥

क्रोष्टु अस् [ङसिँ / ङस्]

- क्रोष्टृ अस्   (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्टुर् स्   (ऋत उत् ६.१.१११ इति उत्वम्)

❖ अत्र संयोगान्तस्य लोपः ८.२.२३ इत्यनेन सकारलोपे प्राप्ते,

208 रात्सस्य ८.२.२४

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य ।

- रात् ५.१, सस्य ६.१, [संयोगान्तस्य ६.१], [लोपः १.१]
- नियमसूत्रम् - संयोगान्तलोपनियमः
- "सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति" – पूर्वतनसूत्रेणैव सकारलोपे सिद्धे इदं नियमार्थम् ।
- तेन ऊर्क्, अमार्ट् इत्यादिषु रेफात् परस्य हलः लोपो न ।

208 रात्सस्य ८.२.२४

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः।

क्रोष्टुः क्रोष्टुः ।

क्रोष्टु अस् [ङसिँ / ङस्]

- क्रोष्टु अस् (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्टर् स् (ऋत उत् ६.१.१११ इति उत्वम्)
- क्रोष्टुर् (रात्सस्य ८.२.२४ इति सकारलोपः)
- क्रोष्टुः (खरवसानयोर्विसर्जनीयः ८.३.१५ इति विसर्गः)

208 रात्सस्य ८.२.२४

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः।

क्रोष्टुः क्रोष्टुः ।

क्रोष्टु अस् [ङसिँ / ङस्]

तृज्वद्भावाभावपक्षे,

- क्रोष्टो अस् (घेर्ङिति ७.३.१११ इति गुणः)
- क्रोष्टोस् (ङसिङसोश्च ६.१.११० इति पूर्वरूपम्)
- क्रोष्टोः (रुत्वविसर्गौ)

208 रात्सस्य ८.२.२४

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः।

क्रोष्टुः क्रोष्टुः । **क्रोष्ट्रोः क्रोष्ट्रोः।**

क्रोष्टु ओस्

- क्रोष्टृ ओस् (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्ट्रोस् (इको यणचि ६.१.७७ इति यण्)
- क्रोष्ट्रोः (रुत्वविसर्गौ)

तृज्वद्भावाभावपक्षे, क्रोष्ट्वोः (यण्, रुत्वविसर्गौ)

208 रात्सस्य ८.२.२४

॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam . Saṃskṛtiḥ . Saṃskāraḥ

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्।

- क्रोष्टु + आम्
- अत्र विभाषा तृतीयादिष्वचि ७.१.९७ इत्यनेन तृज्वद्भावः भवेत्, उत ह्रस्वनद्यापो नुट् ७.१.५४ इति नुडागमः ?
  - तृज्वद्भावस्य अवकाशः क्रोष्ट्रा, क्रोष्ट्रे इत्यादिषु
  - नुटः अवकाशः रामाणाम्, हरीणाम्, शम्भूनाम् इत्यादिषु
  - तुल्यबलत्वात् विप्रतिषेधे, परत्वात् तृज्वद्भावस्य प्राप्तिः

208 रात्सस्य ८.२.२४

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्।

- नुम्-अचिर-तृज्वद्भावेभ्यः, नुट्, पूर्व-विप्रतिषेधेन
- पूर्वविप्रतिषेधः = विप्रतिषेधे पूर्वसूत्रस्य बलवत्त्वम्
- नुडागमः (ह्रस्वनद्यापो नुट् ६.१.५४) एतेभ्यः बलवत्तरः
  - नुम् - इकोऽचि विभक्तौ ७.१.७३, अचिर – अचि र ऋतः ७.२.१००, तृज्वद्भावः – विभाषा तृतीयादिष्वचि ७.१.९७

208 रात्सस्य ८.२.२४

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्।

क्रोष्टु + आम्

- क्रोष्टु नाम्   (ह्रस्वनद्यापो नुट् ७.१.५४ इति नुडागमः)
- क्रोष्टूनाम्   (नामि ६.४.३ इति दीर्घः)

208 रात्सस्य ८.२.२४

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्। **क्रोष्टरि।**

क्रोष्टु इ [ङि]

- क्रोष्टृ इ (विभाषा तृतीयादिष्वचि ७.१.९७ इति वा तृज्वद्भावः)
- क्रोष्टरि (ऋतो ङिसर्वनामस्थानयोः ७.३.११० इति गुणः)

तृज्वद्भावाभावपक्षे

- क्रोष्ट औ (अच्च घेः ७.३.११९ इति प्रत्ययस्य औकारः, अङ्गस्य अत्)
- क्रोष्टौ (वृद्धिरेचि ६.१.८८ इति वृद्धिः)

208 रात्सस्य ८.२.२४

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्। क्रोष्टरि। **पक्षे हलादौ च शम्भुवत्॥**

- तृज्वद्भावः
  - सर्वनामस्थाने नित्यं भवति । क्रोष्टा, क्रोष्टारौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ
  - तृतीयादिषु अचि विकल्पेन भवति । क्रोष्ट्रा / क्रोष्टुना, क्रोष्ट्रे / क्रोष्टवे, क्रोष्टुः / क्रोष्टोः, क्रोष्ट्रोः / क्रोष्ट्वोः, क्रोष्टरि / क्रोष्टौ
  - सम्बुद्धौ, शसि, आमि, तृतीयादिषु हलादौ न भवति । हे क्रोष्टो, क्रोष्टून्, क्रोष्टुभ्याम्, क्रोष्टुभिः, क्रोष्टुभ्यः, क्रोष्टूनाम्, क्रोष्टुषु

पाठस्य सारांशः

171. क्रोष्टु (पुं)
उकारान्तः पुल्लिङ्गः 'क्रोष्टु'-शब्दः
[Jackal]

	ए.व.		द्वि.व.		ब.व.
प्र. वि.	क्रोष्टा		क्रोष्टारौ		क्रोष्टारः
सं. प्र. वि.	हे क्रोष्टो		हे क्रोष्टारौ		हे क्रोष्टारः
द्वि. वि.	क्रोष्टारम्		क्रोष्टारौ		क्रोष्टून्
तृ. वि.	क्रोष्ट्रा	क्रोष्टुना	क्रोष्टुभ्याम्		क्रोष्टुभिः
च. वि.	क्रोष्ट्रे,	क्रोष्टवे	क्रोष्टुभ्याम्		क्रोष्टुभ्यः
प. वि.	क्रोष्टुः	क्रोष्टोः	क्रोष्टुभ्याम्		क्रोष्टुभ्यः
ष. वि.	क्रोष्टुः	क्रोष्टोः	क्रोष्ट्रोः	क्रोष्ट्वोः	क्रोष्टूनाम्
स. वि.	क्रोष्टरि	क्रोष्टौ	क्रोष्ट्रोः	क्रोष्ट्वोः	क्रोष्टुषु

नित्यं तृज्वद्भावः
- सौ अनङ्, उपधादीर्घः
- अन्यत्र गुणः, उपधादीर्घः

तृज्वद्भावः यत्र नास्ति, तत्र शम्भुवद् रूपाणि

विकल्पेन तृज्वद्भावः
- टा, ङे, ओस् – यण्
- ङसिङसोः – उत्वम्
- ङौ - गुणः

पाठे अधीतः मूलभागः

- 206 विभाषा तृतीयादिष्वचि ७.१.९७
- अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे॥
- 207 ऋत उत् ६.१.१११
- ऋतो ङसिङसोरति उदेकादेशः। रपरः॥

पाठे अधीतः मूलभागः

❖ 208 रात्सस्य ८.२.२४

❖ रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः।

क्रोष्टुः क्रोष्टुः । क्रोष्ट्रोः क्रोष्ट्रोः।

❖ नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन (वार्त्तिकम्) ।

क्रोष्टूनाम्। क्रोष्टरि। पक्षे हलादौ च शम्भुवत्॥